# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा–अक्टूबर, २०१९

| | | |
|---|---|---|
| कक्षा – शास्त्रिद्वितीयवर्षम् (SEM-3) | **प्रश्नपत्रम्** – ८ | गुणाः - ७० |
| विषयः – रामानुजवेदान्तः | **कोड** – C.E.2.3.6 | समयः – ८ तः ११ |
| दिनाङ्कः – १७/१०/२०१९ | सन्दर्भग्रन्थः – तैत्तिरीयैतरेयोपनिषदौ (रङ्गरामानुजभाष्यसहिते) | |

### प्रथमान्वितिः (Unit-1)

**प्रश्नः – १ कयोश्चिद् द्वयोः प्रश्नयोः व्याख्यानं यथाभाष्यं लिखत । १०**

(१) शिक्षाध्यायं सविशदं प्रतिपादयत ।

(२) "पाङ्क्तं वा इदं सर्वम्" इत्यस्य प्रतिपादनं यथाभाष्यं कुरुत ।

(३) वेदमनूच्याचार्योऽन्तेवासिनं किमनुशास्ति?

**प्रश्नः – २ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं निबन्धयत । १०**

(१) अष्टमस्यानुवाकस्य सारतत्त्वं प्रतिपादयत ।

(२) अहं वृक्षस्य रेरिवा कीर्तिरिति मन्त्रस्य व्याख्यानं यथाभाष्यं लिखत ।

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः – ३ अधस्तनप्रश्नेषु द्वयोः प्रश्नयोः सविशदमुत्तरं लिखत । १०**

(१) आनन्दवल्ल्याः शान्तिमन्त्रं विलिख्य तद्भावार्थं यथाभाष्यं लिखत ।

(२) आनन्दमयरूपस्य ब्रह्मणः स्वरूपं प्रतिपादयत ।

(३) यशो जनेऽशानि . . . . . . . . मृजे स्वाहा ।

**प्रश्नः – ४ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं लिखत । १०**

(१) परब्रह्मणः स्वरूपं यथाभाष्यं प्रतिपादयत ।

(२) आनन्दवल्ल्याः सारांशं यथाग्रन्थं लिखत ।

### तृतीयान्वितिः (Unit-3)

**प्रश्नः – ५ अधस्तनप्रश्नेषु द्वयोः प्रश्नयोः सविशदमुत्तरं लिखत । १०**

(१) "आत्मा वा इदमेक एवाग्र आसीत् । नान्यत् किञ्चन मिषत् " इत्यस्य व्याख्यानं विधेयम् ।

(२) कति लोकाः सन्ति? तान् कोऽसृजत् ?

(३) गवाकृतिं परमेश्वरसृष्टामवलोक्य देवताः किमब्रुवन् ?

**प्रश्नः – ६ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं लिखत । १०**

(१) यथाग्रन्थं `सृष्टिं सक्रमं प्रतिपादयत ।

(२) ऐतरेयोपनिषदः द्वितीयाध्यायस्य सारभागं वर्णयत ।

**प्रश्नः – ७ अधोनिर्दिष्टेषु दशानाम् अतिलघूत्तरं यच्छत ।** **१०**

(१) सृष्टेः प्राक्त् कः आसीत्?

(२) लोकाः लोकपालाश्च केन सृष्टा ?

(३) वाग्भूत्वा मुखं कः प्राविशत् ?

(४) शरीरे सन्निहितो जीवः सुषुप्तिदशायां कुत्र आवसति ?

(५) सञ्ज्ञानं आज्ञानं विज्ञानं प्रज्ञानमिति एतेषामर्थं यथाभाष्यं लिखत ।

(६) ऐतरेयोपनिषति कति अध्यायाः सन्ति?

(७) ऋग्वेदीयोपनिषत् का अस्ति?

(८) कस्माद् भीषा वातः पवते ?

(९) कुतो वाचः निवर्तन्ते ?

(१०) अन्नमयप्राणमययोः क आत्मा ?

(११) तैत्तिरीयोपनिषदि कति वल्लयः सन्ति? काश्च ताः?

(१२) भृगुः कस्य सुतः अस्ति?

(१३) भार्गवी वारुणी विद्या का?

(१४) अन्नशब्दस्य व्युत्पत्तिलभ्योऽर्थः कः?

(१५) भृगुः वारुणिः पितरं किं प्रोक्तवान् ?

***